दर्शिताः यथा "प्रेकोचैचा द्वितीयास्ताः प्रेतपक्षे गते तु या। या तु कोजागरे याते चैत्रावल्याः परेऽपि या। चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः। पराख्येतास्त्वनध्यायः पुराणैः परिकीर्त्तित" इति राजमार्त्तण्डः। "चैत्रकृष्णद्वितीयायां तिसृष्वेवाष्टकासु च मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा। पञ्चयोर्माघमासस्य द्वितीयां परिवर्ज्जयेदिति" भुजबलः। "मन्वादौ च युगादौ च शिष्यान्नाध्यापयेद्बुधः"। निर्णयामृते "रात्रौ यामद्वयादर्व्वाक् सप्तमी च त्रयोदशी। प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः॥ रात्रौ नवसु नाड़ीषु चतुर्थी यदि दृश्यते। प्रदोषः स तु विज्ञेयोवेदाध्ययनगर्हित" इति॥ निर्णयसिन्धौ प्रजापतिः।"षष्ठी च द्वादशी चैव अर्द्धरात्रोननाड़िका। प्रदोषे त्वनधीयीत तृतीया नवनाड़िका"॥ वृद्धगर्गः।"स्मृतिषूक्तानानध्यायान् सप्तमीञ्च त्रयोदशीम्। पञ्चयोर्माघमासस्य द्वितोयां परिवर्जयेत्" इति। अनध्यायास्तु द्विविधा नित्या नैमित्तिकाश्चेति तत्र नित्याः। "आषाढ़े फाल्गुने ज्यैष्ठे या द्वितीया विधुक्षये। चातुर्मास्यद्वितीयास्ताः प्रवदन्ति महर्षयः"॥ गर्गोऽपि॥ "कृष्णपक्षे द्वितीयायां फाल्गुनाषाढ़कार्त्तिके। शुक्लाश्वयुग्द्वितीयायां नैवाध्ययनमाचरेत्" इति॥ "एतायुगादयः प्रोक्ताः स्वाध्यायं वर्जयेद्बुध" इति उश०। गौतमः। "चातुर्मास्यद्वितीयासु, मन्वादिषु युगादिषु। अष्टकासु च संक्रान्तौ शयने बोधने हरेः। अनध्यायं प्रकुर्वीत तथा सोपपदासु चेति"। सोपपदास्तु।"सिता ज्यैष्ठे द्वितीया च आश्विने दशमी तथा। चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृता इति" गर्गोक्ताः। वृहन्मनुः "पक्षद्वये चतुर्दश्योरष्टमीद्वितीये तथा। पक्षादावपि पक्षान्ते ब्रह्म नाधीयते नरैः॥ अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्द्दशी। अमावस्योभयं हन्ति प्रतिपत् पाठमात्रत" इति। मनुः नैमित्तिकानध्यायानाह स्म। "सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने। अतब्रह्मं न कुर्व्वीत" इति॥ तथापस्तम्बः॥ "उल्कायामग्न्युत्पाते च सर्वासां विद्यानामाकालिकमिति"॥ स्मृत्यन्तरे॥ "विद्युद्गर्जितवृष्टीनां सन्निपातोयदा भवेत्। अनध्यायं प्रकुर्व्वीतेत्यादि"। "अतेऽङ्कि पूर्वसन्ध्यायां वारिदो यदि गर्ज्जति। तद्दिनं स्यादनध्यायं अतं तत्र विवर्जयेत्॥ "सायं सन्ध्यास्तनिते, प्रातःसन्ध्यास्तनिते अहोरात्रौ, विद्युत्यपररात्रावधि विद्युति, नक्तञ्चापररात्रादिति गौत०। स्मृतिरत्नावल्याम् "कालवृष्टौ च तत्कालमकाले च त्रिरात्रकम्। अतिमात्राथवा वृष्टिर्नाधीयीत दिनत्रयम्॥ अनुराधर्क्षमारभ्य षोड़शर्क्षेषु भास्करः। यावच्चरति चैत्रावदकालं मुनयो विदुः॥ तथा च वराहः। मार्गीन्मासात् प्रभृति मुनयोव्याससवाल्मीकिगर्गाश्चैत्रं यावत् प्रवर्षणविधौ नेतिकालं वदन्ति। नाड़ीजङ्घः सुरगुरुमुनिः प्राह वृष्टेरकालौ मासावेतावशुभफलदौ पौषमाघौ न शेषाः"। तत्राकालवृष्टौ पशुमर्त्यचरणाङ्कितायामेव दोषोनान्यथा उक्तञ्च मुहूर्त्तचिन्तामणौ "यदि मासु चतुर्षु पौषमासादिषु भवेदकालवृष्टिः। पशुमर्त्यचरणाङ्कितायां यावद्वसुधा नहि तावद्दोष" इति। तत्र दिनसंख्याप्युक्ता तत्रैव। एकैनैकमहः प्रोक्तं द्वितीयेन त्रिरात्रकम्। तृतीयेन तु सप्ताहं दशरात्रमतः परमिति, पौषे दिनत्रयं वर्ज्यं माघे चैव दिनद्वयम्। फाल्गुने दिनमेकन्तु चैत्रे तु घटिकाद्वय" मित्यावश्यककार्य्यविषयम्। "अनध्यायस्य पूर्व्वेद्युस्तस्य चैवापरेऽह्नि। व्रतबन्धं विसर्गञ्च विद्यारम्भं न कारयेत्, इति नैमित्तिकानध्यायः। मनुरपि नित्याद्यनध्यायमाह स्म। "इमान्नित्यानधयायानधीयानो विवर्जयेत्। अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम्॥ कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने। एतौ वर्षास्वनध्यायावध्यज्ञाः प्रचक्षते। विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे। आकालिकमनध्यायमेतेषु मनुरब्रवीत्। एतांस्त्वभ्युदितान् विद्यात् यदा प्रादुष्कृताग्निषु। तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने। निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने। एतानाकालिकान् विद्यादनध्यायानृतावपि। प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने। सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा। नित्यानध्यायएव स्याद्ग्रामेषु नगरेषु च। धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा। अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ। अनध्यायो रुद्यमाने समवाये जनस्य च। उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने। उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत्। प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्। त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके। यावदेकानुद्दिष्टस्य गन्धो लेपश्च तिष्ठति। विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत्। शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम्। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च। नीहारे वाणशब्दे च सन्ध्ययोरेव चोभयोः। अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च। अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी। ब्रह्माष्टका-